# संस्कृतवार्ताः

**दिनाङ्कः 29.05.2026**

**प्रातः - 06:55**

**अथ वार्ताः**

**प्रधानमन्त्री/जनजातीय-सुरक्षा-कल्याणमञ्चः**

प्रधानमन्त्री नरेन्द्र-मोदी गतदिने जनजातीय-सुरक्षा-कल्याणमञ्चस्य प्रतिनिधिभिः सह मिलितवान्। ह्यः नवदिल्ल्याम् आकारितस्य जनजातीय-सुरक्षा-कल्याणमञ्चस्य उपवेशनस्य अनन्तरं सामाजिक-सञ्चारतन्त्र-माध्यमेन श्रीमोदी उक्तवान् यत् आदिवासि-समुदायं प्रति तस्य मञ्चस्य समर्पणं यथार्थतया प्रशंसनीयम् अस्ति।

**अमितशाहः/गुजरातम्**

केन्द्रीय-गृह-सहकारिता-मन्त्री अमितशाहः पुनरेकदा अवैध-प्रवासिनाम् अभिज्ञानार्थं, निर्वासनार्थं सीमा-सुरक्षां च सुदृढीकर्तुं सर्वकारस्य प्रतिबद्धतां दृढतया प्रतिपादितवान्। गतवासरे, गुजराते गान्धिनगरे चत्वारिंशदधिक-त्रिशत-कोटि-रूप्यकाणां विकास-परियोजनानाम् उद्घाटनस्य शिलान्यासस्य च अनन्तरं जनसभां सम्बोधयन् श्रीशाहः पश्चिमबङ्गाल-सर्वकारस्य अपि प्रशंसाम् अकरोत्, यतः शासनेन एकसप्ताहाभ्यन्तरे सीमा-सुरक्षा-बलाय षट्शत-हेक्टर्-परिमिता भूमिः प्रदत्ता। वीर-सावरकरमहोदयस्य जन्म-वार्षिक्याः अवसरे गृहमन्त्री तस्य योगदानाय त्यागाय च तस्मै श्रद्धाञ्जलिं प्रदत्तवान्। गुजरात-राज्यस्य त्रिदिवसीय-यात्रायां श्रीशाहः अनेकेषां सार्वजनिक-सौकर्याणाम् उद्घाटनम् अकरोत्। अत्रान्तरे सः अहमदाबाद-नगरे आगामिनि-ओलिम्पिक्-क्रीडानां, कॉमन्वेल्थ्-क्रीडानां, विश्वारक्षक-क्रीडानाम् अग्नि-क्रीडानां च सज्जतायाः समीक्षाम् अकरोत्।

**राष्ट्रपतिः/सिक्किमयात्रा**

राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः आरक्षक-बलाय बोधितवती यत् आरक्षकाः अधिकं नागरिकाभिमुखाः भवेयुः, अपि च, समाजस्य दुर्बल-वर्गाणां विशेषतः महिलानां, निर्धनानां बालकानां च विषये संवेदनशीलतां धारयेयुः। राष्ट्रपतिः गतवासरे गङ्गटोक-नगरे आयोजिते अलङ्करण-संचलने सिक्किमारक्षक-दलाय प्रतिष्ठितं 'राष्ट्रपति-ध्वज-सम्मानं' प्रदाय एवम् उक्तवती। तया राज्ये विधि-व्यवस्थायाः पालने सहैव आपत्-प्रबन्धने सिक्किमारक्षक-दलस्य भूमिकायाः भूरिशः प्रशंसा कृता।

**उपराष्ट्रपतिः/त्रिदिवसीययात्रा**

उपराष्ट्रपतिः सी.पी.राधाकृष्णन् अद्य आरभ्य अस्य मासस्य एकत्रिंशद्-दिनाङ्क-पर्यन्तं कर्णाटक-गोवा-केरल-राज्यानां त्रिदिवसीय-यात्रायां भविष्यति। अद्य सः कर्णाटके बेङ्गलूरु-नगरे आर्ट्-आफ्-लिविंग्-फाउण्डेशन्-इत्येतस्य संस्थानस्य पञ्चचत्वारिंशद्-वर्षपूर्त्यवसरे आयोजिते वैश्विक-समारोहे सहभागं करिष्यति। तदनन्तरं सः कर्नाटकस्य दावणगेरे स्थितस्य विश्वविद्यालय-बीडीटी-अभियान्त्रिकी-महाविद्यालयस्य प्लैटिनम्-जुबली इति महारजत-जयन्त्युत्सवे अपि सहभागं करिष्यति।

## कर्नाटकमुख्यमन्त्री

कर्नाटकस्य मुख्यमन्त्री सिद्धरमय्या इत्यसौ गतवासरे लोकभवने राज्यपालस्य सचिवाय औपचारिकरूपेण स्वकीयं त्यागपत्रं समर्पितवान्। वार्ताहरान् सम्बोधयन् सः प्रमाणितवान् यत् त्यागपत्रं सचिवाय औपचारिकरुपेण प्रदत्तमिति। अत्रावसरे सः राज्यपालं नूतन-मुख्यमन्त्रिणः पदभार-ग्रहणाय आमन्त्रयितुं साग्रहं निवेदितवान्, यतो हि विधानसभायां षट्त्रिंशदधिकैक-शताधिक-विधायकानां समर्थनेन काङ्ग्रेस्-दलस्य पूर्ण-बहुमतं वर्तते। तेन सूचितं यत् काङ्ग्रेस्-उच्चाधिकारिभिः तस्मै राज्यसभायाः सदस्यता प्रस्ताविता आसीत्, परञ्च सः राष्ट्रिय-राजनीतौ स्वकीयाम् अरुचिं प्रकटयन् उक्तवान् यत् सम्प्रति असौ राज्यस्य जनानां कृते एव निरन्तरं कार्यं करिष्यति इति।

## ऋतुः

भारतीयर्तु-विभागेन अनुमितं यत् देशस्य उत्तर-पश्चिमीय-दिग्विभागस्य कतिपयेषु क्षेत्रेषु अतिताप-घटनायाम् अपचितिः भविष्यति। राष्ट्रिय-राजधान्यां दिल्ल्यां गतसायं वृष्टि-झञ्झावात-कारणात् तापमितिः ईषत् अपचिता।

## आई.पी.एल. क्रिकेट

आई.पी.एल्.-क्रिकेट्-स्पर्धा-मालिकायां, नवचण्डीगढे महाराज-यादवीन्द्र-सिंहान्ताराष्ट्रिय-क्रिकेट्-क्रीडाङ्गणे अद्य उपान्त्य-चक्रीये द्वन्द्वे गुजरात-टाइटन्स्-दलं राजस्थान-रॉयल्स्-दलेन समं स्पर्धिष्यते। एषा स्पर्धा सायं सार्ध-सप्तवादने आरप्स्यते। अत्र विजेतृदलं निर्णायके द्वन्द्वे रॉयल्-चैलेंजर्स्-बेंगलुरु-दलं सम्मुखीकरिष्यति। शृङ्खलायाः निर्णायक-स्पर्धा रविवासरे अहमदाबादे नरेन्द्र-मोदि-क्रीडाङ्गणे आयोजयिष्यते।

।।इति वार्ताः।।